DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

READINGS IN SANSKRIT
PART 3

# WEEK TWO

DIAMOND MOUNTAIN UNIVERSITY

Readings in Sanskrit, 3
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Spring Term, Class Schedule

**WEEK TWO: Thursday, May 1, 2008, 1:00 – 4:00 PM**

A. Quiz
B. Review of homework (Bhagavad Gita verses; Nagarjuna, Chapters 24, 25)

**HOMEWORK:**

1. Provide a word by word English translation of verses below from the भगवद् गीता
2. Provide a word by word English translation of Chapter 26 of Arya Nagarjuna's मूलमध्यमककारिका (see below).

## भगवद् गीता

अयतिः श्रद्धयोपेतो योगाच्चलितमानसः ।
अप्राप्य योगसंसिद्धिं कां गतिं कृष्ण गच्छति ॥ ६-३७ ॥

कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मणः पथि ॥ ६-३८ ॥

एतन्मे संशयं कृष्ण छेत्तुमर्हस्यशेषतः ।
त्वदन्यः संशयस्यास्य छेत्ता न ह्युपपद्यते ॥ ६-३९ ॥

श्रीभगवानुवाच ।

पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते ।

न हि कल्याणकृत्कश्चिद् दुर्गतिं तात गच्छति ॥ ६-४० ॥

प्राप्य पुण्यकृतां लोकानुषित्वा शाश्वतीः समाः ।

शुचीनां श्रीमतां गेहे योगभ्रष्टोऽभिजायते ॥ ६-४१ ॥

अथवा योगिनामेव कुले भवति धीमताम् ।

एतद्धि दुर्लभतरं लोके जन्म यदीदृशम् ॥ ६-४२ ॥

तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकम् ।

यतते च ततो भूयः संसिद्धौ कुरुनन्दन ॥ ६-४३ ॥

## मूलमध्यमककारिका

### द्वादशाङ्गपरीक्षा नाम षड्विंशतितमं प्रकरणं

पुनर्भवाय संस्कारानविद्यानिवृतस्त्रिधा।

अभिसंस्कुरुते यांस्तैर्गतिं गच्छति कर्मभिः॥ १

विज्ञानं संनिविशते संस्कारप्रत्ययं गतौ।

संनिविष्टे ऽथ विज्ञाने नामरूपं निषिच्यते॥ २

निषिक्ते नामरूपे तु षडायतनसंभवः।

षडायतनमागम्य संस्पर्शः संप्रवर्तते॥ ३

चक्षुः प्रतीत्य रूपं च समन्वाहारमेव च।

नामरूपं प्रतीत्यैवं विज्ञनं संप्रवर्तते॥ ४

संनिपातस्त्रयाणां यो रूपविज्ञानचक्षुषां।

स्पर्शः स तस्मात्स्पर्शाच्च वेदना संप्रवर्तते॥ ५

वेदनाप्रत्यया तृष्णा वेदनार्थं हि तृष्यते।

तृष्यमाण उपादानमुपादत्ते चतुर्विधं॥ ६

उपादाने सति भव उपादातुः प्रवर्तते।

स्याद्धि यद्यनुपादानो मुच्येत न भवेद्भवः॥ ७

पञ्च स्कन्धाः स च भवो भवाज्जातिः प्रवर्तते।

जरामरणदुःखादि शोकाः सपरिदेवनाः॥ ८

दौर्मनस्यमुपायासा जातेरेतत्प्रवर्तते।

केवलस्यैवमेतस्य दुःखस्कन्धस्य संभवः॥ ९

संसारमूलान् संस्कारानविद्वान् संस्करोत्ययतः।

अविद्वान् कारकस्तस्मान्न विद्वांस्तत्त्वदर्शनात्॥ १०

अविद्यायां निरुद्धायां संस्काराणामसंभवः।

अविद्याया निरोधस्तु ज्ञानेनास्यैव भावनात्॥ ११

तस्य तस्य निरोधेन तत्तन्नाभिप्रवर्तते।

दुःखस्कन्धः केवलो ऽयमेवं सम्यग्निरुध्यते॥ १२